# Natya Shastra Chapter 20

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૨૦

## Document Information

Text title : naaTyashaastra adhyaaya 20

File name : natya20.itx

Category : nATyashAstra, major_works, bharata

Location : doc_z_misc_major_works

Author : Sage Bharata

Transliterated by : dpadmakar at hotmail.com

Proofread by : dpadmakar at hotmail.com

Latest update : October 6, 2001

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૨૦

॥ શ્રીરસ્તુ ॥

ભરતમુનિપ્રણીતં નાટ્યશાસ્ત્રમ્

અથ વિંશોऽધ્યાયઃ ।

સમુત્થાનં તુ વૃત્તીનાં વ્યાખ્યામ્યનુપૂર્વશઃ ।
યથા વસ્તૂદ્ભવં ચૈવ કાવ્યાનાં ચ વિકલ્પનમ્ ॥ ૧॥

એકાર્ણવં જગત્ કૃત્વા ભગવાનચ્યુતો યદા ।
શેતે સ્મ નાગપર્યઙ્કે લોકાન્ સંક્ષિપ્ય માયયા ॥ ૨॥

અથ વીર્યબલોન્મતાવસુરૌ મધુકૈઅટભૌ ।
તર્જયામાસતુર્દેવં તરસા યુદ્ધકાङ્ક્ષયા ॥ ૩॥

નિજબાહૂ વિમૃદનન્તૌ ભૂતભાવનમક્ષયમ્ ।
જાનુભિર્મુષ્ટિભિશ્ચૈવ યોધયામાસતુઃ પ્રભુમ્ ॥ ૪॥

બહુભિઃ પરુષૈર્વાક્યૈરન્યોન્યસમભિદ્રવમ્ ।
નાનાધિક્ષેપવચનૈઃ કમ્પયન્તાવિવોદધિમ્ ॥ ૫॥

તયોર્નાનાપ્રકારાણિ વચાંસિ વદતોસ્તદા ।
શ્રુત્વા ત્વભિહતમના દ્રુહિણો વાક્યમબ્રવીત્ ॥ ૬॥

કિમિદં ભરતીવૃત્તિર્વાગ્ભિરેવ પ્રવર્તતે ।
ઉત્તરોત્તરસંબદ્ધા નન્વિમૌ નિધનં નયઃ ॥ ૭॥

પિતામહવચઃ શ્રુત્વા પ્રોવાચ મધુસૂદનઃ ।
કાર્યહેતોર્મયા બ્રહ્મન્ ભારતીયં વિનિર્મિતા ॥ ૮॥

વદતાં વાક્યભૂયિષ્ઠા ભારતીયં ભવિષ્યતિ ।
તસ્માદેતૌ નિહન્મ્યદ્યેત્યુવાચ વચનં હરિઃ ॥ ૯॥

શુદ્ધૈરવિકૃતૈરઙ્ગૈઃ સાઙ્ગહારૈસ્તથા ભૃશમ્ ।

યોધયામાસતુર્દૈત્યૌ યુદ્ધમાર્ગવિશારદૌ ॥ ૧૦॥

ભૂમિસંયોગસંસ્થાનૈઃ પદન્યાસૈર્હરેસ્તદા ।
અતિભારોઽભવદ્ ભૂમેર્ભારતી તત્ર નિર્મિતા ॥ ૧૧॥

વલ્ગિતૈઃ શાર્ઙ્ગધનુષસ્તીવ્રૈર્દીપ્તતરૈરથ ।
સત્વાધિકૈરસંભ્રાન્તૈઃ સાત્ત્વતી તત્ર નિર્મિતા ॥ ૧૨॥

વિચિત્રૈરઙ્ગહારૈસ્તુ દેવો લીલાસમન્વિતૈઃ ।
બબન્ધ યચ્છિખાપાશં કૈશિકી તત્ર નિર્મિતા ॥ ૧૩॥

સંરમ્ભાવેગબહુલૈર્નાનાચારી સમુત્થિતૈઃ ।
નિયુદ્ધકરણૈશ્ચિત્રૈરુત્પન્નારભટી તતઃ ॥ ૧૪॥

યાં યાં દેવઃ સમાચષ્ટે ક્રિયાં વૃત્તિષુ સંસ્થિતામ્ ।
તાં તદર્થાનુગૈર્જપ્યૈર્દ્રુહિણઃ પ્રત્યપૂજયત્ ॥૧૫॥

યદા હતૌ તાવસુરૌ હરિણા મધુકૈટભૌ ।
તતોઽબ્રવીત્ પદ્મયોનિર્નારાયણમરિન્દમમ્ ॥ ૧૬॥

અહો વિચિત્રૈર્વિષમૈઃ સ્ફુટૈઃ સલલિતૈરપિ ।
અઙ્ગહારૈઃ કૃતં દેવ ત્વયા દાનવનાશનમ્ ॥ ૧૭॥

તસ્માદયં હિ લોકસ્ય નિયુદ્ધસમયક્રમઃ ।
સર્વશસ્ત્રવિમોક્ષેષુ ન્યાયસંજ્ઞો ભવિષ્યતિ ॥ ૧૮॥

ન્યાયાશ્રિતૈરઙ્ગહારૈર્ન્યાયાચ્ચૈવ સમુત્થિતૈઃ ।
યસ્માદ્યુદ્ધાનિ વર્તન્તે તસ્માન્યાયાઃ પ્રકીર્તિતાઃ ॥ ૧૯॥

[ચારીષુ ચ સમુત્પન્નો નાનાચારીસમાશ્રયઃ ।
ન્યાયસંજ્ઞઃ કૃતો હ્યેષ દ્રુહિણેન મહાત્મના॥ ૨૦॥

તતો વેદેષુ નિક્ષિપ્તા દ્રુહિણેન મહાત્મના ।
પુનરિષ્વસ્ત્રજાતે ચ નાનાચારીસમાકુલે ॥ ૨૧॥

પુનર્નાટ્યપ્રયોગેષુ નાનાભાવસમ્ન્વિતાઃ ।
વૃત્તિસંજ્ઞાઃ કૃતા હ્યેતાઃ કાવ્યબન્ધસમાશ્રયાઃ] ॥ ૨૨॥

ચરિતૈર્યસ્ય દેવસ્ય જપ્યં યદ્યાદૃશં કૃતમ્ ।
ઋષિભિસ્તાદૃશી વૃત્તિઅઃ કૃતા પાઠ્યાદિસંયુતા ॥ ૨૩॥

નાટ્યવેદસમુત્પના વાગઙ્ગાભિનયાત્મિકા ।
મયા કાવ્યક્રિઅયાહેતોઃ પ્રક્ષિપ્તા દ્રુહિણાજ્ઞયા ॥ ૨૪॥

ઋગ્વેદાદ્ભારતી ક્ષિપ્તા  યજુર્વેદાચ્ચ સાત્ત્વતી ।
કૈશિકી સામવેદાચ્ચ શેષા ચાથર્વણાદપિ ॥ ૨૫॥

યા વાક્પ્રધાના પુરુષપ્રયોજ્યા
સ્ત્રીવર્જિતા સંકૃતપાઠ્યયુક્તા ।
સ્વનામધેયૈર્ભરતૈઃ પ્રયુક્તા
સા ભારતી નામ ભવેત્તુ વૃત્તિઃ ॥ ૨૬॥

ભેદાસ્તસ્યાસ્તુ વિજ્ઞેયાશ્ચત્વારોઽઙ્ગત્વમાગતાઃ ।
પ્રરોચનામુખં ચૈવ વીથી પ્રહસનં તથા ॥ ૨૭॥

જયાભ્યુદયિની ચૈવ મઙ્ગલ્યા વિજયાવહા ।
સર્વપાપપ્રશમની પૂર્વરઙ્ગે પ્રરોચના ॥ ૨૮॥

[ઉપક્ષેપેણ કાવ્યસ્ય હેતુયુક્તિસમાશ્રયા ।
સિદ્ધેનામન્ત્રણા યા તુ વિજ્ઞેયા સા પ્રરોચના] ॥  ૨૯॥

નટી વિદૂષકો વાપિ પારિપાર્શ્વિક એવ વા ।
સૂત્રધારેણ સહિતાઃ સંલાપં યત્તુ કુર્વતે ॥ ૩૦॥

ચિત્રૈર્વાક્યૈઃ સ્વકાર્યોત્થૈર્વીત્થ્યઙ્ગૈરન્યથાપિ વા ।
આમુખં તત્તુ વિજ્ઞેયં બુધૈઃ પ્રસ્તાવનાપિ વા ॥ ૩૧॥

[લક્ષણં પૂર્વમુક્તં તુ વીત્થ્યાઃ પ્રહસનસ્ય ચ ।
આમુખાઙ્ગાન્યતો વક્ષ્યે યથાવદનુપૂર્વશઃ] ॥ ૩૨॥

ઉદ્ઘાત્યકઃ કથોદ્ઘાતઃ પ્રયોગાતિશયસ્તથા ।
પ્રવૃત્તકાવલગિતે પઞ્ચાઙ્ગાન્યામુખસ્ય તુ ॥ ૩૩॥

ઉદ્ઘાત્યકાવલગિતલક્ષણં કથિતં મયા ।
શેષાણાં લક્ષણં વિપ્રા વ્યાખ્યાસ્યામ્યાનુપૂર્વશઃ ॥ ૩૪॥

સુત્રધારસ્ય વાક્યં વા યત્ર વાક્યાર્થમેવ વા ।
ગૃહીતાં પ્રવિશેત્પાત્રં કથોદ્ઘાતઃ સ કીર્તિતઃ ॥ ૩૫॥

પ્રયોગે તુ પ્રયોગં તુ સૂત્રધારઃ પ્રયોજયેત્ ।
તતશ્ચ પ્રવિશેત્પાત્રં પ્રયોગાતિશયો હિ સઃ ॥ ૩૬॥

કાલપ્રવૃત્તિમાશ્રિત્ય વર્ણના યા પ્રયુજ્યતે ।
તદાશ્રયાચ્ચ પાત્રસ્ય પ્રવેશસ્તત્પ્રવૃત્તકમ્ ॥ ૩૭॥

એષામન્યતમં શ્લિષ્ટં યોજયિત્વાર્થયુક્તિભિઃ ।
[તસ્માદઙ્ગદ્વયસ્યાપિ સમ્ભવો ન નિવાર્યતે ॥ ૩૮॥

પાત્રગ્રન્થૈરસંબાધ પ્રકુર્યાદામુખં તતઃ ।
એવમેતદ્બુધૈર્જ્ઞેયમામુખં વિવિધાશ્રયમ્ ॥ ૩૯॥

લક્ષણં પૂર્વમુક્તં તુ વીથ્યાઃ પ્રહસનસ્ય ચ ।
[ઇત્યષ્ટાર્ધવિકલ્પા વૃત્તિરિયં ભારતી મયાભિહિતા ।
સાત્ત્વત્યાસ્તુ વિધાનં લક્ષણયુક્ત્યા પ્રવક્ષ્યામિ ] ॥ ૪૦॥

યા સાત્ત્વતેનેહ ગુણેન યુક્તા ન્યાયેન વૃત્તેન સમન્વિતા ચ ।
હર્ષોત્કટા સંહૃતશોકભાવા સા સાત્ત્વતી નામ ભવેત્તુ વૃત્તિઃ
॥ ૪૧॥

વાગઙ્ગાભિનયવતી સત્ત્વોત્થાનવચનપ્રકરણેષુ ।
સત્ત્વાધિકારયુક્તા વિજ્ઞેયા સાત્ત્વતી વૃત્તિઃ ॥ ૪૨॥

વીરાદ્ભુતરૌદ્રરસા નિરસ્તશૃઙ્ગારકરુણનિર્વેદા ।
ઉદ્ધતપુરુષપ્રાયા પરસ્પરાધર્ષણકૃતા ચ ॥ ૪૩॥

ઉત્થાપકશ્ચ પરિવર્તકશ્ચ સલ્લાપકશ્ચ સંઘાત્યઃ ।
ચત્વારોઽસ્યા ભેદા વિજ્ઞેયા નાટ્યકોવિદૈઃ ॥ ૪૪॥

અહમપ્યુત્થાસ્યામિ ત્વં તાવદ્દર્શયાત્મનઃ શક્તિમ્ ।
ઇતિ સંઘર્ષસમુત્થસ્તજ્જ્ઞૈરુત્થાપકો જ્ઞેયઃ ॥ ૪૫॥

ઉત્થાનસમારબ્ધાનર્થાનુત્સૃજ્ય યોઽર્થયોગવશાત્ ।
અન્યાનર્થાન્ ભજતે સ ચાપિ પરિવર્તકો જ્ઞેયઃ ॥ ૪૬॥

[નિર્દિષ્ટવસ્તુવિષયઃ પ્રપઞ્ચબદ્ધસ્ત્રિહાસ્યસંયુક્તઃ ।
સંઘર્ષવિશેષકૃતસ્ત્રિવિધઃ પરિવર્તકો જ્ઞેયઃ] ॥ ૪૭॥

સાધર્ષજો નિરાધર્ષજોઽપિ વા રાગવચસંયુક્તઃ ।
સાધિક્ષેપાલાપો જ્ઞેયઃ સલ્લાપકઃ સોઽપિ ॥ ૪૮॥

[ધર્માધર્મસમુત્થં યત્ર ભવેદ્રાગદોષસંયુક્તમ્ ।
સાધિક્ષેપં ચ વચો જ્ઞેયઃ સંલાપકો નામ] ॥ ૪૯॥

મન્ત્રર્થવાક્યશક્ત્યા દૈવવશાદાત્મદોષયોગાદ્વા ।
સંઘાતભેદજનનસ્તજ્જ્ઞૈઃ સંઘાત્યકો જ્ઞેયઃ ॥ ૫૦॥

[બહુકપટસંશ્રયાણાં પરોપઘાતાશયપ્રયુક્તાનામ્ ।
કૂટાનાં સંઘાતો વિજ્ઞેયઃ કૂટસંઘાત્યઃ ] ॥ ૫૧॥

ઇત્યષ્ટાર્ધવિકલ્પા વૃત્તિરિયં સાત્ત્વતી મયાભિહિતા ।
કૈશિક્યાસ્ત્વથ લક્ષણમતઃપરં સમ્પ્રવક્ષ્યામિ ॥ ૫૨॥

યા શ્લક્ષ્ણનૈપથ્યવિશેષચિત્રા સ્ત્રીસંયુતા યા બહુનૃત્તગીતા ।
કામોપભોગપ્રભવોપચારા તાં કૈશિકીં વૃત્તિમુદાહરન્તિ ॥ ૫૩॥

[બહુવદ્યનૃત્તગીતા શૃઙ્ગારાભિનયચિત્રનૈપથ્યા ।
માલ્યાલઙ્કારયુક્તા પ્રશસ્તવેષા ચ કાન્તા ચ ॥ ૫૪॥

ચિત્રપદવાક્યબન્ધૈરલઙ્કૃતા હસિતરુદિતરોષાદ્યૈઃ ।
સ્ત્રીપુરુષકામયુક્તા વિજ્ઞેયા કૈશિકીવૃત્તિઃ] ॥ ૫૫॥

નર્મ ચ નર્મસ્ફુઞ્જો નર્મસ્ફોટોઽથ નર્મગર્ભશ્ચ ।
કૈશિક્યાશ્ચત્વારો ભેદા હ્યેતે સમાખ્યાતાઃ ॥ ૫૬॥

આસ્થાપિતશૃઙ્ગારં વિશુદ્ધકરણં નિવૃત્તવીરરસમ્ ।
હાસ્યપ્રવચનબહુલં નર્મ ત્રિવિધં વિજાનીયાત્ ॥ ૫૭॥

ઈર્ષ્યાક્રોધપ્રાયં સોપાલમ્ભકરણાનુવિદ્ધં ચ ।
આત્મોપક્ષેપકૃતં સવિપ્રલમ્ભં સ્મૃતં નર્મ ॥ ૫૮॥

નવસઙ્ગમસમ્ભોગો રતિસમુદયવેષવાક્યસંયુક્તઃ ।
જ્ઞેયો નર્મસ્ફુઞ્જો હ્યવસાનભયાત્મકશ્ચૈવ ॥ ૫૯॥

વિવિધાનાં ભવાનાં લવૈર્લવૈર્ભૂષિતો બહુવિશેષૈઃ ।
અસમગ્રાક્ષિપ્તરસો નર્મસ્ફોટસ્તુ વિજ્ઞેયઃ ॥ ૬૦॥

વિજ્ઞાનરૂપશોભા ધનાદિભિર્નાયકો ગણૈર્યત્ર ।
પ્રચ્છનાં વ્યવહર્તે  કર્યવષાન્નર્મગર્ભોઽસૌ ॥ ૬૧॥

[પૂર્વસ્થિતૌ વિપદ્યેત નાયકો યત્ર ચાપરસ્તિષ્ઠેત્ ।
તમપીહ નર્મગર્ભં વિદ્યાન્નાટ્યપ્રયોગેષુ ] ॥ ૬૨॥

ઇત્યષ્ટાર્શવિકલ્પા વૃત્તિરિયં કૈશિકી મયાભિહિતા ।
અત ઊર્ધ્વમુદ્ધતરસામરભટિં સમ્પ્રવક્ષ્ય્યમિ ॥ ૬૩॥

આરભટપ્રાયગુણા તથૈવ બહુકપટવઞ્ચનોપેતા ।
દમ્ભાનૃતવચનવતી ત્વારભટી નામ વિજ્ઞેયા ॥ ૬૪॥

[આવપાતાપ્લુલઙ્ગિતાનિ ચ્છેદ્યાનિ માયાકૃતમિન્દ્રજાલમ્ ।
ચિત્રાણી યુદ્ધાનિ ચ યત્ર નિત્યં તાં તાદૃશીમારભટીં વદન્તિ
॥ ૬૫॥

શાડ્ગુણ્યસમાબ્ધા હઠાતિસન્ધાનવિદ્રવોપેતા ।
લાભાલાભાર્થકૃતા વિજ્ઞેયા વૃત્તિરારભટી ॥ ૬૬॥

સંક્ષિપ્તકાવપતૌ વસ્તૂત્થાપનમથાપિ સમ્ફેટઃ ।
એતે હ્યસ્યા ભેદા લક્ષણમેષં પ્રવક્ષ્યામિ ॥ ૬૭॥

અન્વર્થશિલ્પયુક્તો બહુપુસ્તોત્થાનચિત્રનેપથ્યઃ ।
સંક્ષિપ્તવસ્તુ વિષયો જ્ઞેયઃ સંક્ષિપ્તકઓ નામ ॥ ૬૮॥

ભયહર્ષસમુત્થાનં વિદ્રવવિનિપાતસમ્ભ્રમાચરણમ્ ।
ક્ષિપ્રપ્રવેશનિર્ગમમવપાતમિમં વિજાનીયાત્ ॥ ૬૯॥

સર્વરસસમાસકૃતં સવિદ્રવ્વિદ્રવાશ્રયં વ્વપિ ।
નાટ્યં વિભાવ્યતે યત્તદ્વસ્તૂત્થાપનં જ્ઞેયમ્ ॥ ૭૦॥

સંરમ્ભસમ્પ્રયુક્તો બહુયુદ્ધકપટનિર્ભેદઃ ।
શસ્ત્રપ્રહરબહુલઃ સમ્ફેટો નામ વિજ્ઞેયઃ ॥ ૭૧॥

એવમેતા બુધૈર્જ્ઞેયા વૃત્તયો નાટ્યસંશ્રયા ।
રસપ્રયોગમાસાં ચ કીર્ત્યમાનં નિબોધત ॥ ૭૨॥

હાસ્યશૃઙ્ગરબહુલા કૈશિકી પરિચક્ષિતા ।
સત્ત્વતી ચાપિ વિજ્ઞેયા વીરાદ્ભુતશમાશ્રયાઃ ॥ ૭૩॥

રૌદ્રે ભયાનકે ચૈવ વિજ્ઞેયારભટી બુધૈઃ ।
બીભત્સે કરુણે ચૈવ ભારતી સમ્પ્રકીર્તિતા ॥ ૭૪॥

[ ન હ્યેકરસજં કવ્યં કિઞ્ચિદસ્તિ પ્રયોગતઃ ।
ભાવો વાપિ રસો વાપિ પ્રવૃત્તિર્વૃત્તિરેવ વા ॥ ૭૫॥

સર્વેષાં સમવેતાનાં યસ્ય રૂપં ભવેદ્બહુ ।
સ મન્તવ્યો રસ સ્થાયિ શેષાઃ સઞ્ચારિણઃ સ્મૃતાઃ] ॥ ૭૬॥

વૃત્યન્ત એશોऽભિનયો મયોક્તો વાગઙ્ગસત્ત્વપ્રભવો યથાવદ્ ।
આહાર્યમેવાભિનયં પ્રયોગે વક્ષ્યામિ નેપથ્યકૃતં તુ ભૂયઃ ॥ ૭૭॥

ઇતિ ભારતીયે નાટ્યશાસ્ત્રે વૃત્તિવિકલ્પનં નામ વિંશોऽધ્યાયઃ

Encoded by Padmakar Dadegaonkar dadegaonkar@yahoo.com

*Natya Shastra Chapter 20*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*